## गोचरसञ्चरवहव्रजव्यजापणनिगमाश्च। (११९/३२९८)

गोचरादयः शब्दाः [1]घप्रत्ययान्ता निपात्यन्ते पूर्वस्मिन्नेवार्थे। 'हलश्च' (३.३.१२१/३३००) इति घञं वक्ष्यति, तस्यायमपवादः। गावश्चरन्ति अस्मिन् इति गोचरः[2]। सञ्चरन्ते अनेन इति सञ्चरः[3]। वहन्ति [4]तेन वहः। व्रजन्ति तेन व्रजः। व्यजन्ति तेन व्यजः[5]। निपातनात् 'अजेर्व्यघञपोः' (२.४.५६/२२९२) इति वीभावो न भवति। एत्य [6]तस्मिन्नापणन्ते इत्यापणः। निगच्छन्ति तस्मिन् इति निगमः[7]। चकारोऽनुक्तसमुच्चयार्थः। कषः। [8]निकषः॥

## अवे तॄस्त्रोर्घञ्। (१२०/३२९९)

अवे उपपदे तरतेः [9]स्तृणातेश्च धातोः करणाधिकरणयोः[10] सञ्ज्ञायां घञ् प्रत्ययो भवति। [11]घस्यापवादः। ञकारो [12]वृद्ध्यर्थः स्वरार्थश्च। घकारः उत्तरत्र कुत्वार्थः। अवतारः। अवस्तारः[13]। कथम् [14]अवतारो नद्याः, न हीयं सञ्ज्ञा? [15]प्रायानुवृत्तेः असञ्ज्ञायामपि भवति॥

## हलश्च। (१२१/३३००)

पुंसि सञ्ज्ञायाम्, करणाधिकरणयोश्च[16] इति सर्वमनुवर्तते। हलन्ताद् धातोः [17]करणाधिकरणयोः घञ् प्रत्ययो भवति। [18]घस्यापवादः। लेखः। वेदः। वेष्टः। बन्धः। मार्गः। [19]अपामार्गः। वीमार्गः॥

## अध्यायन्यायोद्यावसंहाराधारावायाश्च। (१२२/३३०१)

अध्यायादयः शब्दाः [20]घञन्ता निपात्यन्ते। पुंसि सञ्ज्ञायां घे (३.३.११८/३२९६) प्राप्ते घञ् विधीयते। अहलन्तार्थ आरम्भः। [21]अधीयते अस्मिन् इति अध्यायः। [22]नीयत अनेन इति न्यायः। उद्युवन्ति अस्मिन् इति उद्यावः। संह्रियन्तेऽनेन [23]इति संहारः। आध्रियन्ते अस्मिन् इति आधारः। आवयन्ति [24]अस्मिन्निति आवायः। चकारोऽनुक्तसमुच्चयार्थः। अवहारः॥

---

1. घप्रत्ययान्ता नास्ति ब. 2. देशः इत्यधिकम् अ. ब. क. ड. फ. ह. 3. अध्वा इत्यधिकम् फ, मार्गः इत्यधिकम् अ. 4. अनेन इति क. 5. तालवृन्तम् इत्यधिकम् फ. 6. अस्मिन् फ, नास्ति ब, आपणन्ति ह. 7. छन्दः वेदः इत्यधिकम् अ. 8. निकषन्ति अनेन इति निकषः ह. 9. स्तृणतेः ह. 10. पुंलिङ्गयोश्च इत्यधिकम् ह, सञ्ज्ञायां नास्ति फ. 11. घस्यापवादः नास्ति ब. 12. वृद्धिस्वरार्थः अ. ब. 13. अवतरः अपि इत्यधिकम् अ. 14. अवतरः ह. 15. प्रायेणग्रहणानुवृत्तेः ब, प्रायेण इत्यनुवृत्तेः ड. 16. च नास्ति फ. 17. करणाधिकरणयोः नास्ति फ. 18. प्रायेण इत्यधिकम् क. 19. अपमार्गः ह. 20. घञन्ता नास्ति फ. 21. अधीयन्ते ह. 22. न्येति निश्चिनोति अनेन इति शास्त्रयुक्त्यादिरत्र न्यायः इति अ. 23. इति नास्ति फ. 24. तस्मिन् ह.